2026

**UGVYDE605**

**महाभाष्यम् (पस्पशाह्निकम्)**

पञ्चमपत्रम्

**पूर्णाङ्काः** – 60

**समयः** – सार्धघण्टाद्वयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम्। 1×10 =10

1. महाभाष्यस्य रचनाकारः कः ?
2. महाभाष्यमिति कस्य ग्रन्थस्य व्याख्यानम् ?
3. अथ शब्दानुशासनमित्यत्र अथशब्दस्यार्थः कः?
4. व्याकरणाध्ययनस्य मुख्यप्रयोजनानि कानि ?
5. प्रधाने कृतो यत्नः किं भवति ?
6. असन्देहस्य कः अर्थः ?
7. शब्दानां प्रतिपत्तौ प्रतिपदपाठे कः अध्येता आसीत्?
8. शब्दः नित्यो वा कार्यो वा उभयम् वा ?
9. सिद्धशब्दः कस्य पर्यायवाची ?
10. व्याकरणमित्यत्र कः पदार्थः?

अधस्तनेषु पञ्चप्रश्नाः समाधेयाः। 6x5 =30

11. केषां शब्दानाम् अनुशासनं भवति ? तेषां शब्दानाम् उदाहरणं लिखत।
12. कति व्याकरणाध्ययनस्य गौणप्रयोजनानि सन्ति ? तेषां नामानि लिखत ।
13. केन प्रकारेण शब्दानां प्रतिप्रत्तिः भवति इति वर्णयत।
14. अनुबन्धकरणार्थश्च इत्यस्य आशयं लिखत।
15. असन्देहः इत्यस्य आशयं भाष्यदिशा प्रतिपादयत ।
16. प्रियतद्धिताः दाक्षिणात्याःइति वाक्यस्य कः आशयः ?
17. पञ्च पञ्चनखा भक्ष्याः इति वाक्यं पतञ्जलिदिशा प्रतिपादयत।

अधस्तनेषु प्रश्नेषु द्वौ समाधेयौ । 10×2=20

18. कस्तर्हि शब्दः इत्यस्य उत्तरं भाष्यदिशा वर्णयत।
19. चत्वारि इति प्रयोजनं भाष्यदिशा प्रतिपादयत।
20. सिद्धे शब्दार्थसम्बन्धे, इति वार्तिकं सावतरणं वर्णयत।
21. किमर्थो वर्णानामुपदेशः इति विषये पतञ्जलिमतं सम्यङ्निरूपणीयम्।

****